# संस्कृत ( सामान्य ) - 2012

**समय : 3 घण्टे ]** **कक्षा : 10वीं** **[ पूर्णांक : 100**

**निर्देश- ( 1 ) सर्वे प्रश्नाः अनिवार्याः सन्ति। ( 2 ) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।**

प्रश्न 1. उचित विकल्पं चित्वा लिखत-

(क) 'अत्याचारः' इत्यस्मिन् पदे सन्धिः अस्ति- 1

(अ) गुण सन्धिः (ब) यण् सन्धिः
(स) अयादि सन्धिः (द) दीर्घ सन्धिः

(ख) 'तल्लीनः' इत्यस्मिन् पदे सन्धिः अस्ति- 1

(अ) व्यंजन सन्धिः (ब) वृद्धि सन्धिः
(स) विसर्ग सन्धिः (द) पूर्वरूप सन्धिः

(ग) 'विसर्ग सन्धेः उदाहरणमस्ति- 1

(अ) षडाननः (ब) तच्छीलः
(स) प्रत्येकः (द) मनोरथः

(घ) 'महा + औषधिः' इत्यस्य सन्धिः अस्ति- 1

(अ) महोषधिः (ब) महाऔषधिः
(स) महौषधिः (द) महैषधिः

प्रश्न 2. (क) 'चौरभयम् ' इत्यस्मिन् पदे समास अस्ति- 1

(अ) द्वितीया तत्पुरूषः (ब) चतुर्थी तत्पुरूषः
(स) सप्तमी तत्पुरूषः (द) पञ्चमी तत्पुरूषः

(ख) कर्मधारय समासस्य उदाहरणम् अस्ति- 1

(अ) कृष्णसर्पः (ब) सचक्रम्
(स) पीताम्बरः (द) परोपकारः

(ग) 'रूपस्य योग्यम्' इत्यस्य पदस्य सामासिक पदमस्ति- 1

(अ) रूप योग्यम् (ब) रूपं योग्यम्
(स) अनुरूपम् (द) योग्यरूपम्

प्रश्न 3. (क) 'क्तवतु' प्रत्ययस्योदाहरणसमस्ति- 1

(अ) गुणवान् (ब) लिखितवान्
(स) दर्शनीयम् (द) कम्पमानः

(ख) 'बाल + टाप्' इत्यस्य पदम् भविष्यति- 1

(अ) बालटाप् (ब) बालटा
(स) बाला (द) बालाप्

(ग) 'जेतुम्' इत्यस्मिन् पदे प्रत्ययोऽस्ति- 1

(अ) अनीयर् (ब) तव्यत्
(स) क्त (द) तुमुन्

(घ) 'अहम् विद्यालयं गत्वा पठामि' इत्यस्मिन् वाक्ये कृदन्तम् अस्ति- 1

(अ) क्त्वा (ब) ल्यप्
(स) तुमुन् (द) शतृ

प्रश्न 4. (क) अधोलिखितेषु उपसर्गः अस्ति- 1

(अ) अस्ति (ब) सन्ति
(स) स्तः (द) प्रति

mpcareer.in

(ख) 'निर्धनः' इत्यस्मिन् पदे उपसर्गः अस्ति- 1

(अ) निस् (ब) निर्

(स) नि (द) निध

(ग) अधोलिखितेषु अव्ययम् नास्ति- 1

(अ) इव (ब) अद्य

(स) बालकः (द) शनैः

(घ) 'सदाचारः एव परमोधर्मः' अस्मिन् वाक्ये अव्ययम् अस्ति- 1

(अ) परम (ब) धर्मः

(स) सदाचारः (द) एव

प्रश्न 5. (क) परसदननिविष्टः को................न याति। 1

(अ) लघत्वं (ब) गुरूत्वं

(ख) ..............कर्त्तव्यः प्राणैः कण्ठगतैरपि। 1

(अ) परोपकारः (ब) स्वोपकारः

प्रश्न 6. (क) 'नेष्यामः' इत्यस्मिन् पदे धातुः अस्ति- 1

(अ) नेष् (ब) नी

(स) नेष्य् (द) नेस्

(ख) 'पचेः' इत्यस्मिन् पदे पुरूषः अस्ति- 1

(अ) प्रथम पुरूषः (ब) उत्तम पुरूषः

(स) मध्यम पुरूषः (द) अन्य पुरूषः

(ग) 'द्रक्ष्यन्ति' इत्यस्मिन् पदे लकारः अस्ति- 1

(अ) लट् लकारः (ब) लोट् लकारः

(स) लङ् लकारः (द) लृट् लकारः

(घ) 'अगच्छतम्' इत्यस्मिन् पदे वचनम् अस्ति- 1

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) कोऽपि नास्ति

प्रश्न 7. युग्म मेलनं कुरूत- 4

| 'अ' | 'आ' |
|---|---|
| (क) मनः ज्योतिषाम् | (1) न कुर्यात् |
| (ख) पुरूषादः | (2) एकं ज्योतिः |
| (ग) संस्कृतम् अवश्यमेव शिक्षणीयम् | (3) घटोत्कचः |
| (घ) बालैःसह सख्यम् | (4) विवेकानन्दः |

प्रश्न 8. शुद्ध वाक्यानां समक्षम् 'आम्' अशुद्ध वाक्यानां समक्ष 'न' इति लिखित- 4

(क) कौत्सः गुरूदक्षिणार्थी आसीत् ।

(ख) छत्रसालः 'बुन्देलकेसरी' इति नाम्ना प्रसिद्धः।

(ग) धनेन अमृतत्वं प्राप्यते।

(घ) मानव शरीर देव दुर्लभं नास्ति।

प्रश्न 9. प्रदत्तैः शब्दैः रिक्त-स्थान पूर्ति कुरूत- 4

(नादेशे, मनः,नीरोगः, श्रेष्ठः)

(क) तन्मे............शिवसङ्कल्पमस्तु।

(ख) ज्येष्ठः ............कुले लोके।

(ग) न नक्तं............चरेत् ।

(घ) मनुष्य सदा............भवेत ।

mpcareer.in

प्रश्न 10. अधोलिखित शब्देषु चतुर्णां शब्दानां रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत- 4

(क) कवि-चतुर्थी विभक्तिः

(ख) नामन् -द्वितीया विभक्तिः

(ग) अस्मद्-प्रथमा विभक्तिः

(घ) तत् (पुल्लिङ्ग)-द्वितीया विभक्तिः

(ङ) साधु-षष्ठी विभक्तिः

प्रश्न 11. निम्नलिखित प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृत भाषायाम् एकपदेन लिखत- 4

(क) मनः जाग्रतः कुत्र उदेति?

(ख) वैयाकरणेषु पूर्णः सर्वमान्यश्च कः?

(ग) आत्महिताय किम् अनुष्ठेयम् ?

(घ) भारतस्य पुरातनः सखा कः विद्यते?

(ङ) महाभारतस्य प्रणयनं केन कृतम् ?

प्रश्न 12. निम्नलिखित प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृत-भाषायाम् एकवाक्येन लिखत- 6

(क) छत्रसालः कस्य शिष्यः आसीत् ?

(ख) विदिशा नगरी कस्मिन् प्रदेशे स्थिता विद्यते?

(ग) कृषीबलैः काः समेधिताः भवन्तु?

(घ) सर्वप्राचीना भाषा का अस्ति?

प्रश्न 13. अधीलिखितगद्यांशं सम्यक् पठित्वा प्रश्नानामुत्तराणि लिखत-

स्वस्थ-शरीरे एवं स्वस्था बुद्धिः वसति। स्वस्था बुद्धि एव स्वस्थ विचाराणां जननी अस्ति। व्यायामशीलः मनुष्यः एव नीरोगः चिरंजीवी च भवति। व्यायामशीलाः मनुष्याः प्रायेण रूग्णाः न भवन्ति। विविध रोगाणां चिकित्सा अपि व्यायामेन सम्भवति। अतः जीवनस्य कृते व्यायामः परमावश्यकः।

(क) उपर्युक्तः गद्यांशस्य उचित शीर्षकं लिखित। 2

(ख) स्वस्था बुद्धिः कुत्र वसति? 1

(ग) कः एव नीरोगः? 1

(घ) विविध रोगाणां चिकित्सा केन सम्भवति? 1

प्रश्न 14. स्वस्य प्रायार्यस्य कृते छात्रवृत्यर्थ प्रार्थनापत्रं लिखत।

**(अथवा)** स्व भ्रातुः जन्मदिनोत्सवस्य कृते स्वमित्रस्य आमन्त्रण पत्रं लिखत। 4

प्रश्न 15. अधोलिखित गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां देयानि- 10

(क) वरूण देवः वृष्टिं वर्षति। सूर्यदेवः प्रकाशं प्रयच्छति, भूमाता वृक्षस्य आधारभूता अस्ति। वायुः अनिलं ददाति। ते सर्वे वृक्षं पालयन्ति पोषयन्ति रक्षन्ति च। ते न कदापि "मम अधिकारः वर्तते" इति अवदन् । ते सर्वे परोपकारिणः। परं यूयं सर्वे परोपकारिणः वृक्षस्य साहाय्यं स्वीकृत्य तमेव नाशयितुं कृत सङ्कल्पा यूयं स्वाश्रयमेव नाशयश। अस्मिन् वृक्षे छिन्ने सति यूयं कुत्र गच्छथ?

**प्रश्नः-**

(1) कःवृष्टिं वर्षति?

(2) सूर्यदेवः किं प्रयच्छति?

(3) का वृक्षस्य आधारभूता अस्ति?

(4) कः अनिलं ददाति?

(5) के परोपकारिणः?

mpcareer.in

(ख) 'प्रकृतिरपि समयस्य पालनं कार्यपरायणताम् एवं उपदिशति निरन्तम्' प्रकृतौ यावन्त: पदार्था: सृष्टा: सन्ति ते सर्वेऽपि अहोरात्रं कार्य संलग्ना एव दृश्यते। सूर्य-चन्द्राभ्याम् आरभ्य कीटपतङ्गपिपीलिका पर्यन्तं सर्वेऽपि स्व-स्व व्यापारे व्याप्तता: विलोक्यन्ते। अत: प्रकृत्या अपि इयमेव शिक्षा दीयते यत् नहि केनापि समयस्य अनुपयोग: कर्त्तव्य: इति।

प्रश्न:-

(1) प्रकृतिरपि किं उपदिशति?

(2) प्रकृतौ यावन्त: पदार्था: सृष्ट: सन्ति ते अहोरात्रं कस्मिन संलग्न् एव दृश्यते?

(3) सर्वेऽपि कस्मिन् व्याप्तता: विलोक्यन्ते?

(4) कया समयस्य पालनमेव शिक्षा दीयते?

(5) कस्य अनुपयोग: न कर्त्तव्य:?

(ग) तस्मिन् काले भूलोके गङ्गा न आसीत् । आकाशमार्गे तस्या: प्रवाहं सोढुं भूमि: शक्ता न आसीत् । तां प्रथमत: गृहींतु परमेश्वर: एव शक्त: आसीत्। तस्मात् ईश्वरं ध्यात्वा भागीरथ: तप: कृतवान् । सहस्रवर्षानन्तरम् एव ईश्वर: आकाशगङ्गा स्व जटासु गृहीतुम् अङीकारं दत्तवान् । एवं सा नदी ईश्वरस्य जटासु प्रथमं पतितवती।

प्रश्न:-

(1) तस्मिन् काले कुत्र गङ्गा न आसीत् ?

(2) आकाशमार्गे कस्या: प्रवाहं सोढुं भूमि: शक्ता न आसीत् ?

(3) गंगाम् प्रथमत: गृहीतुं क: शक्त: आसीत् ?

(4) क: तप: कृतवान् ?

(5) 'ईश्वरस्य' इत्यस्य पदस्य विभक्तिं वचनञ्च लिखत।

प्रश्न 16. अधोलिखितपद्यांशेषु पद्यांशद्वयस्य प्रश्नानामुत्तराणि संस्कृत भाषायां लिखत- 10

(क) केयूराणि न विभूषयन्ति पुरूषं हारा न चन्द्रोज्जवला:,
न स्नानं विलेपनं न कुसुमं नालङ्कृता मूर्धजा:।
वाण्येका समलडकरोति पुरूषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।

प्रश्न:-

(1) चन्द्रोज्जवला: हारा कं न विभूषयन्ति?

(2) वाण्येका पुरूषं किं करोति?

(3) कानि खलु क्षीयन्ते?

(4) सततं भूषणं किम् ?

(5) सततं इति शब्दस्य समानार्थी पदं लिखत् ।

(ख) मत्ता गजेन्द्रा मुदिता गवेन्द्रा,
वनेषु विक्रान्ततरा मृगेन्द्रा:।
रम्य नगेन्द्रा निभृता नरेन्द्रा:,
प्रक्रीडितो वारिधरै: सुरेन्द्र:।।

प्रश्न:-

(1) मत्ता: के?

(2) गवेन्द्रा: कीदृशा: भवन्ति?

(3) वनेषु विक्रान्तरा: के?

(4) के निभृता: सन्ति?

(5) सुरेन्द्रः कैः सह प्रक्रीडितः?

(ग) दरिद्रता धीरतया विराजते,
कुवसत्रता शुभ्रतया विराजते।
कदन्नता चोष्णतया विराजते,
कुरूपता शीलतया विराजते।।

**प्रश्नः-**

(1) दरिद्रता कया विराजते?

(2) का शुभ्रतया विराजते?

(3) कदन्नता कया विराजते?

(4) शीलतया का विराजते?

(5) 'विराजते' इति पदस्य धातुः, लकारः, पुरूषः, वचनं च लिखत।

प्रश्न 17. अस्मिन् प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वापाठ्यपुस्तकात् कण्ठस्थीकृतं सुभाषितद्वयं लिखत। 4

प्रश्न 18. अधोलिखित वाक्यानां कथानुसारेण क्रमसंयोजनं कुरूत- 5

(क) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत् ।

(ख) गङ्गातीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म।

(ग) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान् ।

(घ) वासुदेवः तस्य प्रिय शिष्यः आसीत् ।

(ङ) किञ्चिदग्रे गतः वासुदेवः कञ्चित् देवालयम् अपश्यत् ।

प्रश्न 19. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत- 10

(क) संस्कृत भाषायाः महत्वम्।

(ख) सदाचारः।

(ग) मम दिनचर्या।

(घ) अस्माकं देशः।

प्रश्न 20. अधोलिखितेषु पञ्च अशुद्ध वाक्यानां शुद्धिः करणीया- 5

(क) सैनिकः **अश्वेन** पतति।

(ख) श्री **गणेशं** नमः।

(ग) सर्वे बालकाः **धावति**।

(घ) बालकः **विद्यालयस्य** प्रति गच्छति।

(ङ) **जलस्य** विना जीवनं नास्ति।

(च) **भवान्** कुत्र पश्यसि?

(छ) पुस्तकम् **उत्पीठिकायाः** अस्ति।

mpcareer.in